# आदर्शप्रश्नपत्रम्
## द्वितीयसत्रम् (2021-22)
## कक्षा – द्वादशी
## संस्कृतम् (ऐच्छिकम्) (कोड सं.- 022)

**समयः – होराद्वयम्** **पूर्णाङ्काः – 40**

**सामान्यनिर्देशाः –**

1. कृपया सम्यक्तया परीक्षणं कुर्वन्तु यत् अस्मिन् प्रश्नपत्रे 06 पृष्ठानि मुद्रितानि सन्ति।
2. कृपया सम्यक्तया परीक्षणं कुर्वन्तु यत् अस्मिन् प्रश्नपत्रे 09 प्रमुखाः प्रश्नाः सन्ति।
3. उत्तरलेखनात् पूर्वं प्रश्नस्य क्रमाङ्कः अवश्यं लेखनीयः।
4. अस्य प्रश्नपत्रस्य पठनाय 15 निमेषाः निर्धारिताः सन्ति। अस्मिन् अवधौ केवलं प्रश्नपत्रं पठनीयम् उत्तरपुस्तिकायां च किमपि न लेखनीयम्।
5. प्रश्नानाम् उत्तराणि उत्तरपुस्तिकायाम् एकस्मिन् स्थाने क्रमेण लेखनीयानि।
6. प्रश्नानां निर्देशाः ध्यानेन अवश्यं पठनीयाः।
7. प्रश्नसङ्ख्या प्रश्नपत्रानुसारम् अवश्यं लेखनीया।
8. सर्वेषां प्रश्नानाम् उत्तराणि संस्कृतेन लेखनीयानि।

## वर्णनात्मकाः प्रश्नाः 40 अङ्काः

| | अपठितावबोधनम् | |
|---|---|---|
| 1. | **अधोलिखितं गद्यांशं पठित्वा प्रदत्तान् प्रश्नान् संस्कृतेन उत्तरत –**<br>कदाचित् पञ्चदशवर्षीया काचित् बाला पित्रा सह मेलां प्रति प्रस्थिता आसीत्। सा अल्पे एव वयसि विविधासु विद्यासु पारङ्गता चतुरमतिः धैर्यशालिनी च आसीत्। तया नौकया नद्याः प्रयाणम् आरब्धम्। नौकायाम् अन्येऽपि बहवः आसन्। यदा नौका नद्याः मध्यभागम् आगता तदा तस्याः नद्याः अपरस्मात् भागात् भीत्या त्वरया च जले तरन्तौ आगच्छन्तौ कौचित् दृष्टौ। नद्यां कश्चन मकरः तौ अनुधावन् आगच्छन् आसीत्। सर्वेषां मुखे भयस्य आतङ्कस्य च छाया दृश्यते स्म। बालायाः मुखे अपि भीतिः आसीत्। तस्याः भीत्याः कारणं तु न स्वविषयकचिन्ता, अपि तु तयोः रक्षणं कथं स्यात् इत्येव। तयोः क्रन्दनं श्रुतवत्याः तस्याः बालायाः मनः दयार्द्रम् अभवत्। तौ रक्षणीयौ एव इति सङ्कल्प्य सा पितरम् अपश्यत्। ततः तेन निवारिता अपि सा जले कूर्दितवती, मीनः इव च तरन्ती सा तयोः हस्तौ दृढतया गृहीत्वा नौकां प्रति आनीतवती। इमां घटनां दृष्ट्वा सर्वेऽपि आश्चर्येण स्तब्धाः अभवन् । तस्याः पिता अपि ताम् अभिनन्दितवान्। तस्याःच साहसं बहुधा अश्लाघत।<br><br>**(अ) एकपदेन उत्तरत - (केवलं प्रश्नद्वयम्)**<br>(i) पिता अपि बलिकां किं कृतवान्?<br>(ii) केषां मुखे भयस्य आतङ्कस्य च छाया दृश्यते स्म?<br>(iii) कुत्र अन्येऽपि बहवः आसन्?<br><br>**(आ) पूर्णवाक्येन उत्तरत - (केवलं प्रश्नद्वयम्)**<br>(i) बाला कीदृशी आसीत्?<br>(ii) तौ रक्षणीयौ एव इति सङ्कल्प्य बाला किं कृतवती?<br>(iii) यदा नौका नद्याः मध्यभागम् आगता तदा किम् अभवत्?<br>**(इ) अस्य अनुच्छेदस्य समुचितं शीर्षकं लिखत।**<br><br>**(ई) यथानिर्देशम् उत्तरत - (केवलं प्रश्नत्रयम्)**<br>(i) निश्चित्य इति पदस्य पर्यायं गद्यांशात् चित्वा लिखत।<br>(ii) 'श्रुतवत्याः'इति विशेषणपदस्य विशेष्यपदं किम्?<br>(iii) 'निर्भीकतायाः' इति पदस्य विलोमपदं गद्यांशात् चित्वा लिखत।<br>(iv) 'सा अल्पे एव वयसि विद्यासु पारङ्गता' अत्र कर्तृपदं किं प्रयुक्तम्? | 10<br><br><br><br><br><br><br><br><br><br><br><br><br>1×2=2<br><br><br><br><br>2×2=4<br><br><br><br>1×1=1<br><br>1×3=3 |

| | | |
|---|---|---|
| | **रचनात्मककार्यम्** | |
| 2. | भवतां विद्यालये संस्कृतविभागेन दशदिवसीयम् एकं संस्कृतसम्भाषणशिविरम् आयोजयिष्यते । संस्कृतसम्भाषणे नैपुण्यं प्राप्तुम् इच्छन्तः छात्राः अध्यापकाश्च यथासमयं पञ्जीकरणं कारयन्तु इति। एतद् विषयम् अधिकृत्य एकां सूचनां संस्कृतेन लिखत –<br>अथवा<br>"सर्वे सन्तु निरामयाः" इति लक्ष्यम् अधिकृत्य "जनकल्याणसमित्या" एकस्य योगाभ्यासशिविरस्य आयोजनं क्रियते। अधिकाधिकाः जनाः अस्मिन् भागं गृहीत्वा लाभान्विताः भवेयुः इति उद्देश्येन एकम् आकर्षकं विज्ञापनं रचयत – | 1×5=5 |
| | | |
| 3. | प्रदत्ततथ्यानां सहातया अधोलिखितं विषयम् अधिकृत्य संस्कृतेन अनुच्छेदं लिखत -<br>**विषयः – शरीरमाद्यं खलु धर्मसाधनम्।**<br>धर्मपालनस्य स्वरूपम्<br>धर्मपालनस्य प्रमुखं साधनम्<br>धर्मपालनाय शरीरस्य महत्त्वम्<br>स्वस्थशरीरस्य अनिवार्यत्वम्<br>अथवा<br>**विषयः – सत्सङ्गतिः कथय किं न करोति पुंसाम्।**<br>सङ्गतेः महत्त्वम्<br>कीदृशी सङ्गतिः आवश्यकी<br>सत्सङ्गतेः लाभाः<br>उपसंहारः | 5 |
| | | |
| 4. | निम्नलिखितवाक्येषु केषाञ्चन पञ्चवाक्यानां संस्कृतेन अनुवादं कुरुत –<br>1. वाटिका में सुगन्धित फूल खिल रहे हैं।<br>Fragrant flowers are blooming in the garden.<br>2. बच्चे खेल के मैदान में खेल रहे थे।<br>Kids were playing in the playground.<br>3. हम कल विद्यालय में वृक्षारोपण करेंगे।<br>Tomorrow we will plant trees in school.<br>4. सब छात्रों को संस्कृत पढनी चाहिए।<br>All the students must study Sanskrit. | 1×5=5 |

| | | |
|---|---|---|
| | 5. तुम सब सुखी रहो।<br>You all be happy.<br>6. शिष्य गुरु से निवेदन करते हैं।<br>Disciples request the Guru.<br>7. राजा के दोनों ओर सैनिक चल रहे थे।<br>Both the king's sides, soldiers were walking. | |
| | **पठितावबोधनम्** | |
| 5. | **अधोलिखितं गद्यांशं पठित्वा तदाधारितान् प्रश्नान् संस्कृतेन उत्तरत ।**<br>अथ सर्वविधविटपिनां मध्यभागे स्थितः सुमहान् अश्वत्थदेवः वदति – भो भो वनस्पतिकुलप्रदीपा महापादपाः कुसुमकोमलदन्तरुचः लताकुलललनाश्च ! सावहिताः श्रृण्वन्तु भवन्तः। अद्य मानववार्तैवास्माकं समालोच्यविषयः। मानवा नाम सर्वासु सृष्टिधारासु निकृष्टतमा सृष्टिः , जीवसृष्टिप्रवाहेषु मानवा इव पर–प्रतारकाः स्वार्थसाधनपरा मायाविनः कपटव्यवहारकुशलाः हिंसानिरताः जीवाः न विद्यन्ते। | 3 |
| | **(अ) एकपदेन उत्तरत - (केवलं प्रश्नद्वयम्)**<br>(i) पादपेषु समालोच्य विषयः कः आसीत्?<br>(ii) कपटव्यवहारकुशलाः के सन्ति?<br>(iii) महापादपाः सावहिताः कस्य वार्तां श्रृण्वन्तु? | ½×2=1 |
| | **(आ) पूर्णवाक्येन उत्तरत – (केवलं प्रश्नद्वयम्)**<br>(i) जीवसृष्टिप्रवाहेषु मानवाः कीदृशाः जीवाः सन्ति?<br>(ii) अश्त्थदेवः कुत्र स्थितः अस्ति?<br>(iii) महापादपाः कीदृशाः सन्ति? | 1×2=2 |
| | | |
| 6. | **अधोलिखितं पद्यं पठित्वा तदाधारितान् प्रश्नान् संस्कृतेन उत्तरत ।**<br>**गिरौ कलापी गगने पयोदो लक्षान्तरेऽर्कश्च जले च पद्मम्।**<br>**इन्दुर्द्विलक्षे कुमुदस्य बन्धुर्यो यस्य मित्रं न हि तस्य दूरम् ॥** | 3 |
| | **(अ) एकपदेन उत्तरत - (केवलं प्रश्नद्वयम्)**<br>(i) कुमुदस्य बन्धुः कः?<br>(ii) सूर्येण सह कस्य मैत्री अस्ति?<br>(iii) पयोदः कुत्र तिष्ठति? | ½×2=1 |
| | **(आ) पूर्णवाक्येन उत्तरत - (केवलं प्रश्नद्वयम्)**<br>(i) चन्द्रः कुमुदात् कियद् दूरं तिष्ठति?<br>(ii) कलापिनः मित्रं कः अस्ति?<br>(iii) पद्मं कं दृष्ट्वा विकसति? | 1×2=2 |

| | | |
|---|---|---|
| 7. | **अधोलिखितं नाट्यांशं पठित्वा तदाधारितान् प्रश्नान् संस्कृतेन उत्तरत ।**<br>(योगशिक्षकः कक्षायां प्रविशति)<br>छात्राः - नमो नमः आचार्य! स्वागतम् अत्र भवतां कक्षायाम्।<br>योगाचार्यः - छात्राः ! भवन्तः सम्प्रति समुत्सुकाः दृश्यन्ते। काऽपि विशिष्टाः जिज्ञासा अस्ति किम्?<br>सागरः - भो आचार्य ! वयं सर्वे योगस्य उपयोगितायाः विषये सम्यग्रूपेण ज्ञातुम् उत्सुकाः स्मः।<br>योगाचार्यः - प्रियच्छात्राः! किं भवन्तः जानन्ति यत् योगशास्त्रे शरीरस्य मनसः च नियमनं प्रतिपादितं वर्तते।अस्य ज्ञानेन अभ्यासेन च भवन्तः स्वाध्यायेऽपि एकाग्रतां वर्धयितुं सक्षमाः भविष्यन्ति।<br>**(अ) एकपदेन उत्तरत - (केवलं प्रश्नद्वयम्)**<br>(i) छात्राः कक्षायां योगशिक्षकं कथं सम्बोधयन्ति?<br>(ii) योगशिक्षकः कुत्र प्रविशति?<br>(iii) छात्राः कीदृशाः दृश्यन्ते?<br>**(आ) पूर्णवाक्येन उत्तरत - (केवलं प्रश्नद्वयम्)**<br>(i) छात्राः योगस्य अभ्यासेन कस्मिन् सक्षमाः भविष्यन्ति?<br>(ii) छात्राः किं ज्ञातुं समुत्सुकाः आसन्?<br>(iii) योगशास्त्रे कस्य नियमनं प्रतिपादितम् अस्ति? | 3<br><br><br><br><br><br><br><br><br><br>½×2=1<br><br><br><br><br>1×2=2 |
| | | |
| 8. | **अधोलिखितभावार्थे रिक्तस्थानपूर्तिं मञ्जूषापदसहायतया कुरुत –**<br>**"कार्यं वा साधयेयम्, देहं वा पातयेयम्।"**<br>**भावार्थः –** संसारे ये केचन कर्तव्यपरायणाः जनाः सन्ति ते (i) ............... अपि स्वनिर्धारितं कार्यं पूरयन्ति।तेषां मार्गे कियन्तोऽपि विघ्नाः आगच्छेयुः ते (ii) ............... कदापि न विरमन्ति।तादृशाः कर्तव्यनिष्ठमहापुरुषाः (iii) .................. अपि मोहं न कुर्वन्ति।<br>**अथवा**<br>**"अस्तं जिगमिषुर्भगवान् भास्करः सिन्दूरद्रव–स्नातानामिव वरुणदिग्वलम्बिनाम् अरुणवारिवाहानामभ्यन्तरं प्रविष्टः।"**<br>**भावार्थः –** अत्र सायङ्कालीनं (i) ............... सौन्दर्यं वर्णितम् अस्ति। यदा सूर्यः अस्तं गच्छति तदा पश्चिमदिक् रक्तवर्णैः मेघैः (ii) ...........भवति। तद् दृश्यं दृष्ट्वा प्रतीयते यत् मेघाः सिन्दूरमये जले स्नात्वा आगताः सन्ति। तादृशेषु रक्तवर्णीयेषु मेघेषु (iii) ............... अस्तं गच्छति। | 1×3=3 |

| | | |
|---|---|---|
| | **मञ्जूषा –**<br>स्वकार्यात्, प्राकृतिकं, सूर्यः, स्वप्राणानाम् , आच्छादिता, विषमपरिस्थितौ। | |
| | | |
| 9. | अधोलिखित-अन्वये रिक्तस्थानानि पूरयत - (केवलं पद्यमेकम्)<br>**दातव्यं भोक्तव्यं धनविषये सञ्चयो न कर्तव्यः।**<br>**पश्येह मधुकरीणां सञ्चितमर्थं हरन्त्यन्ये।।**<br>**अन्वयः** – धनविषये(i)... ......... न कर्तव्यः(धनं) दातव्यं भोक्तव्यं (वा)। इह (ii) ............... मधुकरीणां सञ्चितम् (iii) ............ अन्ये हरन्ति।<br>अथवा<br>**ददाति प्रतिगृह्णाति गुह्यमाख्याति पृच्छति।**<br>**भुङ्क्ते भोजयते चैव षड्विधं प्रीतिलक्षणम्॥**<br>**अन्वयः** – ददाति प्रतिगृह्णाति (i) ................आख्याति पृच्छति (ii) ................ भोजयते च एव प्रीतिलक्षणं (iii) .................... (भवति)।<br>**मञ्जूषा –**<br>भुङ्क्ते , अर्थम् , सञ्चयः , गुह्यम् , षड्विधं , पश्य | 1×3=3 |

*****************************